International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(1): 08-12
© 2022 IJSR
www.anantaajournal.com
Received: 07-11-2021
Accepted: 09-12-2021

**Gowri P**
Research Assistant,
Oriental Research Institute,
University of Mysore, Mysuru,
Karnataka, India

**Corresponding Author:**
**Gowri P**
Research Assistant,
Oriental Research Institute,
University of Mysore, Mysuru,
Karnataka, India

# लिपिमीमांसा

**Gowri P**

## प्रस्तावना

प्राणिनां सर्वेषां सङ्घजीवित्वं प्रसिद्धं यतो हि ते सुखं वा दुःखं वा कष्टं वा नष्टं वा विभज्य अनुभोक्तुमपेक्षन्ते। एवञ्च स्वानुभवमपि समानधर्मिषु सहृदयेषु विविदिषन्ति, तेषामनुभवमपि जिज्ञसन्ति। एवं तेषां ज्ञानविकासो भवति। तादृशविधौ वाक् प्रथमं स्थानमाप्नोति। ये समानकाले समानदेशे अवतिष्ठन्ते तेषां मध्य एव वाग्व्यापारो भवितुं शक्यते। अन्यथैवं ज्ञानानुभवसङ्क्रमणार्थमन्यस्य मार्गस्यापेक्षा भवति। एतदर्थं मानवेनान्विष्टः शिलायुगादारभ्य उपयुज्यमानः मार्ग एव 'लिपिः', यद्यपि सा काले काले परिष्क्रियमाणा सती विविधरूपान् प्राप्तवती।

लिपिर्नाम कामपि भाषां प्रतिनिदधतां लिपित्वेन जनतासम्मतानां च वर्णविन्यासचिह्नानां श्रेणिः। यत्र जनसम्मतिर्नास्ति तत्र लिपिरपि नोत्पद्यते।

कासाञ्चन भाषाणां लिपिर्वर्तते कासाञ्चन च नास्त्येव। तस्माद्ये लिपिरहितां भाषां वदन्ति ते आवश्यकतानुसारं प्रतिवेशिदेशीयां लिपिमाश्रयन्ति। यतो हि - ते अन्यलिपिनिर्माणरूपमायासं नेच्छन्ति। आश्रितायां लिप्यां स्वभाषागतानां सर्वेषां वर्णानां समुचितध्वनिचिह्नानामुपलब्धिः दुर्लभं भवेच्चेदपि तदानीं त एकस्यैव चिह्नस्य द्वित्राणामुच्चारणानाम् उच्चारितानां ध्वनीनां स्थले समानतया उपयुज्यन्ति। अन्यूनानतिरिक्तं स्वभाषागतं ध्वनिं सूचयितुं विरलेषु च प्रसङ्गेषु द्वित्राणि नूतनानि चिह्नानि सृजेयुः।

यद्यपि भाषाया अभिव्यक्तेः साधनं लिपिः तथाऽपि एकस्याः भाषायाः एकैव निर्दिष्टा लिपिरिति नास्ति। बह्वीषु लिपिषु एकां भाषाम् अभिव्यञ्जयितुं शक्यते। एवञ्च अनेकाः भाषाः एकस्यामेव लिप्यां लेखितुं शक्यन्ते। अनेन भाषालिप्योः सम्बन्धः नाविनाभाव इति ज्ञायते। अत्र प्रसिद्धमुदाहरणं रोमंल्लिपिः। प्रायः लिपिमिमां सर्वा अपि यूरोपीयाः भाषाः लेखितुमुपयुज्यते।

तथा हि - भारतेऽपि तादृशान्युदाहरणानि वर्तन्ते। उदाहरणार्थं देवनागरीलिपिः। इयं देवनागरीलिपिः न केवलं संस्कृतभाषाया लेखने, अपि तु हिन्दी मराठी राजास्थानी नेवारी कोङ्कणी इत्यादीनामपि भाषाणां लेखनार्थमुपयुज्यते।

अपरमुदाहरणं कन्नडलिपिः। कन्नडलिपिः प्राधान्येन कन्नडसंस्कृतभाषयोः लेखने पूर्वमुपयुज्यते स्म। अधुना कोङ्कणी, तुळु, कोडव, जेनुकुरुब, चित्पावनी च एता अपि भाषाः कन्नडसंस्कृताभ्यां मिलिताः। कोङ्कणीभाषा तिसृषु लिपिषु लिख्यते – प्राचीनकालिकध्वनिसङ्केतरोमंल्लिप्यां, देवनागर्यां, कन्नडलिप्यां च।

संस्कृतभाषा विंशत्यधिकाभिः लिपिभिः लिख्यते। कन्नडलिप्या मलयाळलिप्या वा वङ्गलिप्या वा यदि कोऽपि संस्कृतं लेखितुं वाञ्छति, सर्वरीत्या तथा लेखनमस्य कर्तुं

शक्यते। न तत्र कोऽपि दोषः। न काऽपि हानिः। देवनागरीतरासु लिपिषु संस्कृतलेखनं दोषायेति केचन अभिप्रयन्ति। तत्तु न सुष्ठु। देवनागरीतरलिप्या संस्कृतलेखनं नापराधाय। ग्रन्थकर्ता यदा किमपि संस्कृतपरामर्शश्रुतपूर्वं बोधवृद्धये अत्यावश्यकं च पद्यं गद्यं शृणोति तदा स तल्लेखनं स्वस्य मातृभाषालिप्यां कुरुते, तथा हि - बेङ्गलूरुनगरे संस्कृतकृतयः कन्नडलिप्या, चेन्नैस्थः केचन मुद्रणालयाः तेलुगुलिप्या, कुम्भकोणे काञ्च्यां च बहवो ग्रन्थाः ग्रन्थलिप्या मुद्रापिता मुद्राप्यन्ते च। भगवद्गीता न केवलं देवनागरीलिप्या परन्तु विविधाभिः लिपिभिरधुनाऽपि उपलभ्यत इति सार्वजनीनो विषयः।

## कासाञ्चनभारतीयानां लिपीनां सङ्क्षिप्तः परिचय

खरोष्ठी ब्राह्मी च भारतस्य प्राचीनतमे लिप्यौ। अनयोः

## खरोष्ठी

एषा खरस्य (गर्दभस्य) ओष्ठसदृशी बहुवक्ररेखायुता भवतीति प्रायश एवम् अभिहिता स्यादिति केषाञ्चन सुमनसां वक्रचिन्तनम्। अन्येषामभिप्राये खरोष्ठ इति कस्यचन अभिधानम्। तेनान्विष्टा लिपिरियं तस्य नाम्नैव प्रथिता। कस्मिंश्चित्काले लेखाः यथा भित्तिषु शिलासु लिख्यन्ते स्म तथैव उष्ट्राणां खराणां च चर्मसु लिखितः कालः कश्चन स्यादतश्च एतस्याः लिप्या एवमभिधानमित्यपि प्रतिपादयन्ति संशोधकाः। खरोष्ठीलिपिः अरामेयिक्-लिपिसदृशी। एषा च भारतस्य केवलवायव्यभागे विशेषतः प्रचलिता आसीत्। इरान्-देशीयखमेनियन्-साम्राज्यैः शासितेषु पाकिस्तानस्य भूभागा अन्तर्भवन्ति। अतश्च एतस्या लिप्या उगमः अरामेयिक्-लिपित एव अभवत् इति ते समर्थयन्ति। अन्यच्च अशोकस्य शासनेषु विशेषतः वायव्यभागप्रदेशेषु एतस्या लिप्या उपयोगो दृश्यते। अत्यल्पदेशकालव्याप्तत्वात् एतस्याः प्रचारोऽधिकं नाभवत्। एतस्मात्कारणादेव एषा बहुशीघ्रनष्टस्थाना।

## ब्राह्मी

ब्राह्मीलिपिः सर्वासामपि भारतीयानां लिपीनां मूलम्। कैश्चन तमिळुलिपिरेव प्राचीनलिपिरिति अभिप्रेता, परन्तु अयमभिप्रायो न सर्वसम्मतः। ब्राह्मीलिप्याः दाक्षिणात्या औत्तराहा चेति द्वे सृती वर्तते। यद्यपि ब्राह्मीलिपिः सर्वासां भारतीयानां लिपीनां न साक्षाज्जननी तथाऽपि परम्परया तस्याः भारतीयलिपीनां वृक्षमूला इति स्थानं कल्पितम्।
ब्राह्मीलिपिः न केवलं भारतीयानां लिपिः परन्तु श्रीलङ्का, माल्डीव्स्, मयन्मार्, काम्बोडिया, मलेशिया, सयाम्, इण्डोनेषिया इत्यादिषु देशेष्वपि उपयुज्यमानानां लिपीनां मूलमिति केषाञ्चन बुधानामभिप्रायः। पल्लववंशीया राजानः ब्राह्मीलिपिं प्रथमत उपयुक्तवन्त इति केचन अभिप्रयन्ति। आदिमं ब्राह्मीलिपिदाक्षिणात्यरूपं निट्टूरु, उदेगोले, पाल्किगुण्डु, गवीमठः, मास्ती, सिद्दापुर, ब्रह्मगिरि (कर्णाटके), यर्रगुडि तथा राजुलमन्दगिरि (आन्ध्रप्रदेशे) – एतेषु प्रदेशेषु उपलभ्यते। इयं दाक्षिणात्यब्राह्मी (१) कोङ्कण-डेक्कन्-आन्ध्रप्रदेशीया ; (२) द्राविडीया (कलिङ्गरूपा) चेति द्विधा दृश्यते।
(१) कोङ्कण-डेक्कन्-आन्ध्रप्रदेशेषु दृष्टा दाक्षिणात्या ब्राह्मी क्रिस्तपूर्वाद्द्वितीयशतकादारभ्य प्रथमक्रिस्तशकवर्षपर्यन्तं प्रयोग आसीत्। एनां ब्राह्मीं कोङ्कणे, पश्चिमडेक्कन्-प्रदेशे, आन्ध्रप्रदेशस्य केषुचन भागेषु, घुर्जरप्रदेशे, पश्चिममहाराष्ट्रे, दक्षिणमध्यप्रदेशे च शासनेषु द्रष्टुं शक्यते। कोङ्कणान्ध्रपश्चिमडेक्कन्-शासनेषु कानिचन अक्षराणि तत्तद्देशविशिष्टेन आकृतिभेदेन विन्यासभेदेन दृश्यते। कालक्रमेण औत्तरी ब्राह्मी अधिकतरा उपयुक्ता सञ्जाता।
(२) द्राविडीया तु (दाक्षिणात्या ब्राह्मी) कलिङ्गप्रान्ते (अर्थादुत्तरस्यां दिशि महानदी, दक्षिणस्यां दिशि गोदावरी च पूर्वघट्टाश्च सीमाभागाः) तमिळुनाडुप्रदेशे, केरले, दक्षिणकर्णाटके च प्रयुक्ताऽभवत्। विद्वद्भिरस्यां दाक्षिणात्यायां सृतौ (अ) कलिङ्गब्राह्मी (आ) तमिळुब्राह्मी चेति प्रभेदद्वयं कथ्यते। द्राविडी ब्राह्मी क्रिस्तपञ्चमशतक एव औत्तरीय्या ब्राह्म्या आकृतिः भिन्नतराऽभवदिति केषाञ्चन बुधानां मतम्। क्रिस्तपूर्वतृतीयशतकादारभ्य क्रिस्तद्वितीयशतकपर्यन्तम् उत्कीर्णेषु तमिळुनाडुप्रदेशीयानि गुहाशासनेषु, पुदुच्चेरीसमीपस्थेषु अरिकमेडुप्रदेशेषु लब्धेषु शासनेषु, केरलीयवयिनाडुप्रदेशे लब्धेषु शासनेषु लिपिप्रभेदानि दृश्यन्ते ।

## वट्टेळुत्तु

’वट्ट’ इति शब्दस्य ’वृत्तम्’ इति, ’एळुत्तु’ इति शब्दस्य ’लेखनम्’ इत्यर्थः। अर्थात् अधिकेन वृत्ताकारचिह्नेन अस्यां लिप्यां लिखन्ति इति ’वट्टेळुत्तु’ इति संज्ञा। एषा लिपिरतिप्राचीना। पण्णावनसुत्तं (क्रिस्तपूर्व-१६८), समवायाङ्गसुत्तं (प्रायः क्रिस्तशक ३ शतके), भगवतीसुत्तं (क्रिस्तशक ५ शतके) च केचित् दामिलीलिप्यां लिखिताः। दामिलीशब्देन द्राविडीशब्दस्य उच्चारणसादृश्यं दृश्यतेतराम्। चतुष्षष्टिलिपीनां पट्टिका ललितविस्तराख्ये बौद्धपुराणग्रन्थे लभ्यते यासां द्राविडीलिपिरन्यतमा। एषैव लिपिः प्रायशो वट्टेळुत्तुलिपिः। शिलप्पाधिकारादयः प्राचीनाः तमिळुकृतयः अनयैव लिप्या प्रथमं लिखिताः स्युरिति विद्वद्भिरभिप्रयन्ते। समग्रे भारते ब्राह्मीलिप्या बहूनि रूपान्तराणि उपलभ्यन्ते। तथाऽपि सर्वाधिकानि चिह्नान्तराणि वट्टेळुत्तुलिप्यामेव सन्तीति वक्तुं शक्यते।
वट्टेळुत्तुलिपिः तमिळुभाषायाः प्राचीनतमा लिपिः, यां तमिळकं प्रदेशीया उपयुज्यते स्म। तमिळकं नाम चेर-पाण्ड्याधिपत्यधीनः प्रदेशः (तमिळुनाडु) इति। अस्याः लिप्याः लिपिशास्त्रज्ञैः चेरपाण्ड्यलिपिरिति संज्ञा दत्ता। इयं लिपिः कोलारप्रदेशे (कर्णाटके) तथा तमिळुनाडुप्रदेशतः समुपलब्धेषु केषुचन वर्तमानेषु शासनेषु दृश्यते।

क्रिस्तशक एकादशतमे शतके मलयाळभाषाया लेखनमपि अनया लिप्या आरब्धम्।
क्रिस्तशके ११ तमे शतके पाण्ड्यराजानः चोलवंशीयै राजभिः पराजिताः। चोलास्तु तमिळुलिपिमुपयुञ्जन्ते स्म। क्रमेण तमिळुलिपिः सर्वत्र तमिळुनाडुप्रदेशे प्रससार, एवञ्च वट्टेळुत्तुलिपिः ह्रासं गता। क्रिस्तशके १५ तमे शतके तमिळुनाडुप्रदेशे वट्टेळुत्तुलिप्याः उपयोगो न्यूनः सञ्जातः। किन्तु मलयाळं लेखनाय अस्याः लिपेरुपयोगः क्रिस्तशके १८ तम शतकपर्यन्तमनुवृत्तः। वट्टेळुत्तुलिप्याः मलयाळ्मा (मलयाण्मा), कोलेळुत्तु इति च द्वौ प्रभेदौ सञ्जातौ। मलयाणं लिपिविकासानन्तरं वट्टेळुत्तुलिपेरेव मलयाळ्मा (मलयाण्मा) इति संज्ञा दत्ता। कालक्रमेण इयं लिपिः प्रायेण मातृकासु उयज्यते स्म, न तु शासनेषु। अस्याः लिप्या उपयोगः महाराजश्रीस्वातितिरुनाळ्-शासनसमये विनष्टा इति संशोधकानामभिप्रायः।

### तमिळु
इयं लिपिः दाक्षिणात्यब्राह्म्या समीपवर्तीति सूक्तमेव। वट्टेळुत्तु, ग्रन्थ, तमिळुलिपयः दाक्षिणात्यब्राह्म्या एव सन्तानरूपाः। वट्टेळत्तु-ग्रन्थलिप्योः प्रभावः तमिळुलिप्यां दृश्यते। द्राविडभाषाणां विशिष्टाः ध्वनयः यथा वट्टेळुत्तु-ग्रन्थलिप्योः सूचिताः तथैव अस्यां तमिळुलिप्यामपि सूच्यन्ते। तमिळु-ग्रन्थलिप्योः अङ्कानां चिह्नं समानमेव। तमिळुलिपिः प्रायः क्रिस्तशके ४ तमे तथा क्रिस्तशके ५ तमे शतके प्रचलितस्वरूपं प्राप्ता। अस्याः लिप्याः चोलानामधीनेषु प्रदेशेषु उपयोगोऽतितरां दृश्यते स्म। क्रिस्तशकं १२ तमं शतकानन्तरं पाण्ड्यानां प्रदेशेष्वपि एतस्याः लिप्याः प्रचारोऽभवत्।
क्रिस्तशके १२ शतकानन्तरम् उत्कीर्णेषु शासनेषु एषा लिपिः दृश्यते। उदाहरणार्थं १) नन्दिवर्मपल्लवमल्लस्य क्रिस्तशकस्य अष्टमशतकस्य ताम्रपत्राणि, २) नृपतुङ्गवर्मणः नवमशतकस्य शासनानि। क्रिस्तशकं ११ तमं शतकानन्तरं चोलानां शासनेषु केवला तमिळुभाषा उपयुज्यते स्म। एतेन तमिळुलिपिः पाण्ड्यानां शासनावधौ सुस्पष्टस्वरूपं प्राप्य सम्यक् सर्वत्र दृढमूलाऽभवदिति ज्ञायते।

### ग्रन्थलिपि
संस्कृतभाषा भारते प्रचलितासु सर्वासु प्रसिद्धासु लिपिषु लेखितुं शक्यत इत्यत्र न विरोधः। अपि तु एतस्याः भाषायाः तमिळुलिप्यां लेखनं दुस्साध्यम्। यतो हि - तमिळुलिप्यां घोषाघोषाणामल्पप्राणमहाप्राणानां तालव्यमूर्धन्यानां वर्णानां भेदो नावगम्यते। इमां समस्यां परिहर्तुं तमिळुनाडुप्रदेशीयाः संस्कृतविदुषः पार्थक्येन एकां विशिष्टां लिपिमसृजन्। सा च लिपिः ग्रन्थलिपिः। अत्र ग्रन्थशब्दस्य संस्कृतग्रन्थ इत्यर्थः। इयं लिपिः केवला संस्कृतभाषालेखनार्हा। नेतरभाषालेखनाय योग्या इति अस्याभिप्रायः। तमिळु-गुहा-ब्राह्मीलिपिभ्यः ग्रन्थलिप्याः कालक्रमेण विकासोऽभूदिति विदुषां मतम्। ग्रन्थलिप्या उद्गमकालः क्रिस्तशक ५ तमः शतकः ६ तमं शतकम् वा भवेदिति केचन अभिप्रयन्ति।
ग्रन्थलिप्याः चिह्नविकासेषु - १. पुरातनी, २. मध्या, ३. सपरिवर्तना, ४. नवीना चेति चतस्रो अवस्था वर्तन्ते।

**१. पुरातनी:** इमामवस्थां पालक्काडशासने (क्रिस्तशक ५-६ तम शतकयोः), बादामिशासने (क्रिस्तशकं ६ तमं शतकम्), महाबलिपुर-काञ्चीपुरीयेषु पल्लवशासनेषु द्रष्टुं शक्यते।

**२. मध्या:** इयमवस्था चोलशासनेषु, कुरम्-ताम्रफलकेषु (क्रिस्तशकस्य ७ तमस्य शतकस्य तृतीयपादे) तथा पल्लवशासनेषु (क्रिस्तशके ८ तमे शतके) गोचरीभवति।

**३. सपरिवर्तना:** आदिमानां पाण्ड्यराजानां शासनेषु, उत्तमचोलस्य ताम्रफलकेषु सपरिवर्तनालिप्या उपयोगः दृश्यते। अतः क्रिस्तशकात् दशशतकादारभ्य त्रयोदशशतकपर्यन्तं सपरिवर्तनानामग्रन्थलिप्याः प्रयोग आसीदिति अनुमीयते।

**४. नवीना:** या लिपिः मातृकासु दृश्यते सा नवीनाकृतिग्रन्थलिपिः। अर्वाचीने काले मुद्रिताः ग्रन्था अतीवसुन्दरं लिपिचिह्नं प्रकाशयन्ति। मातृकासु अनुपलभ्यमानानां केषाञ्चन वर्णसौन्दर्याणां सृष्टिराधुनिकैः यन्त्रतन्त्रज्ञैः सुष्ठु कृता। सर्वास्वपि जीवन्तीषु लिपिषु ग्रन्थलिपेः प्रभावः बोभूयते।
अनया लिप्या कुम्भकोणे बहव आगमाः (विशिष्य शैवागमाः) मुद्रिताः। अद्यापि लिपिरियं मुद्यमाणा उपलभ्यते। मातृकासु समुपलभ्यमानानां दक्षिणभारतीयानां लिपीनां मध्ये तु ग्रन्थलिपिः मलयाळलिपिः सुन्दरतमे लिपी इति केषाचिन्मतम्।

### शारदा
शारदालिपिः काश्मीरीय-पञ्जाबीय-प्राचीनशिलालेखेषु दानपत्रेषु हस्तलिखितानां सिखमतीयानां पुस्तकेषु पाण्डुलिपिषु विशेषतः दृश्यते। औत्तराहाणां लिपीनामेषा मुख्यतमा लिपिः। एषा कुटिललिपेरन्तरतमा। एषा लिपिः अष्टमशतमानस्य मेरुवर्मणः शासनेषु प्रथमतया दृष्टा। प्रायशः दशमशतमाने औत्तरेषु प्रदेशेषु अधिकतमं प्रचारं प्राप्तेति भाति। प्रायशोऽस्यामथवा नेवारीलिप्यां सर्वा अपि प्रत्यभिज्ञाकृतय उपलभ्यन्ते। ऋते द्वैतविशिष्टाद्वैताभ्यां सर्वेऽपि इतरज्ञानशाखासम्बद्धाः ग्रन्था अनया लिप्या लिखितासु मातृकासु गोचरीभवन्ति। प्रसिद्धविदुषा म्याक्स्मुल्लर्-महोदयेन सम्पादिता ऋग्वेदग्रन्थस्य मातृका

शारदालिपिमय्येव, यैषा अधुनाऽपि पुणेस्थे भण्डार्करीये प्राच्यविद्यासंशोधनालये सुव्यवस्थितरूपेण सुपालिता।

### कन्नडम्

कन्नडलिपिलिखिताभिः मातृकाभिः कर्णाटं पूर्णा लिपिः। ब्राह्मीलिपिः इतरलिपिवत् कन्नडलिप्याः मूलमिति वक्तुं शक्यते। इयं लिपिः प्रायशः क्रिस्तशके ३ तमे शतके ब्राह्मीलिप्या परिवर्तितवर्णविन्यासरूपा विभिन्नाकृत्या विकासं प्राप्ता। क्रिस्तशके ४-५ तमे शतके कदम्बानां काले कन्नडलिपिः पेटिकाशिराकृतिं दधार। कल्याणचालुक्यकाले वर्णविन्यासा अधिकतरं परिवर्तिताकृतयः सन्तो विलसन्ति। वर्णविन्यासकला क्रिस्तशक १२-१३ तमशतकयोर्मध्ये होय्सलाधिपानां शासनकाले किञ्चिदभिवृद्धिमवाप्नोत्। अस्य कालस्य शासनानि शासनेषु सुन्दरतमानि इत्ययम् अंशोऽभिमानार्हः। क्रिस्तशक १४-१६ तमशतकेषु विजयनगरकालिकानि शासनानि वर्णविन्यासेषु कांश्चन व्यत्ययान् दर्शयन्ति, अपि तु तानि न रमणीयानि।
मल्लदेवनन्दिवर्मणः दानशासनमेकं कोलारस्य मुळुबागिलु प्रदेशे लब्धम्। तत् यद्यपि संस्कृतशासनं, लिखिता लिपिस्तु, प्राचीनकन्नडलिपिरस्ति। एतस्य कालः (क्रिस्तशकं ३३८) अतः क्रिस्तशकं २ तमशतमानतः महीशूरुराजानाम् अधिकारावधौ यावत् (१८ शतमानम्) एतस्याः लिप्या विकासः द्रष्टुं शक्यते। प्रायः विद्वांसो लेखकाश्च कन्नडलिपिं द्विसहस्रवर्षेभ्य उपयुञ्जानः सन्ति। तस्मादियमतीवमुख्या लिपिरिति वक्तुं शक्यते।

### नन्दिनागरी

नन्दिनागरीलिपिः द्रष्टुं देवनागरीसदृशी। अपि तु केषुचन वर्णचिह्नेषु सा व्यत्यस्तरूपं स्पष्टमेव दर्शयति। दक्षिणकन्नडप्रान्ते बह्व्यः मातृका अनया लिप्या एव लिखिताः। अनया लिप्या कन्नडं तथा संस्कृतं भाषाद्वयमपि लिखितं दृश्यते। प्रायः माध्ववेदान्तग्रन्थाः सर्वेऽपि नन्दिनागर्याम् अथवा तिगळारिलिप्यामुपलभन्ते। एतस्याः लिपेर्नाम नन्दिनागरीति कथं जाता संज्ञितेत्यत्र विभिन्नाभिप्रायास्सन्ति। डा. प्रीति नयन् पञ्चोली महाराष्ट्रस्य नन्दिनगरे जाता इति अभिप्रयन्ति। नन्दिशब्दस्य देव इत्यर्थः। अतः देवमूलादुत्पन्नेयं लिपिरिति डा. पि.विशालाक्षी स्वकीये 'The Nandinagari Script' इत्यस्मिन् ग्रन्थे अभिप्रयन्ति।
'देवनागर्यां शिरोरेखाया लेखने कण्टस्य तीक्ष्णाग्रत्वात् तालपत्राणि भज्येरन्। तस्माद्विनैव शिरोरेखां लेखनाभ्यासः प्रारब्धो यत्फलतया सृष्टैश्चिह्नैर्बोधजनकत्वं नन्दिनागरिलिप्याः वैशिष्ट्यम्' इति केषाञ्चिन्मतम्। अस्याभिप्रायस्य निरासः न तावत्सुलभः।
नन्दिनागरीलिपिः भूयस्या मात्रया सम्स्कृतलेखनाय उपयुज्यते, अल्पीयसा च मात्रया कन्नडलेखनाय। अस्यां लिप्यां पुरन्दरदासरचिताः काश्चन कन्नड-गेय-रचना उपलभ्यन्ते। माध्ववेदान्तिनः कन्नडस्यापि लेखनावसरे एतस्या लिपेः उपयोगं कुर्वन्ति स्म। नन्दिनागर्यां कन्नडाङ्का एव दृश्यन्ते, न पुनः नन्दिनागरीविशिष्टा अङ्काः।
नन्दिनागरी प्रायः क्रिस्तशके ७ तमे शतके जनिमाप। अस्या लिप्याः सम्पूर्णतया विकासः क्रिस्तशके १० तमे शतके सम्बभूव। नन्दिनागर्या राजोचितं स्थानं विजयनगरीयै राजभिः दत्तमिति कारणात् कर्नाटकेषु सर्वत्र नन्दिनागरी समुपलब्धप्रचुरप्रचारा जाता।

### तिगळारी

तिगळारी मलयाळलिपिसदृशी विनाऽलङ्कारिकविन्यासमिति कथयितुं शक्यते। अत्रत्यानि त्रिचतुराणि वर्णचिह्नानि मलयाळगतेभ्यो वर्णचिह्नेभ्यो सादृश्यं आवहन्ति। दक्षिणकर्णाटके अस्याः लिप्याः उपयोगप्राचुर्यं बोभूयते। एषा लिपिः ग्रन्थ-मलयाळलिप्योः मध्यमावस्थां सूचयति। अनया लिप्या लिखिताः प्रायः १५०० तालपत्रसंस्कृतग्रन्थाः कर्णाटके उपलभ्यमानाः सन्ति। अस्यां कन्नडलिप्यां ग्रन्था अपि केचन सन्ति। कर्णाटकस्य शिवमोग्ग, उत्तरकन्नड मलेनाडु प्रदेशेषु, उडुपि, कासरगोडु प्रान्तेषु संस्कृतवेदमन्त्रान् लेखनार्थं तिगळारिलिपिमेवावलम्बन्ते जनाः। उडुपिप्रान्तस्य अष्टमठेषु तथा कासरगोडु प्रान्ते एनां लिपिं 'तुळुलिपि'रिति अभिधास्यन्तीति केषाञ्चिदाधुनिकानां वादः। किन्तु आधुनिकानां वादो नाङ्गीकारार्हः। तिगळारीति अभिहितया लिप्या संस्कृतकन्नडतुळुनाम्न्यो भाषा लिख्यन्त इति वै स्पष्टम्।
नन्दिनागरिलिपिवत् तिगळारीलिप्यामपि माध्वग्रन्था उपलभ्यन्ते। होन्नावरप्रदेशे सामवेदशाखाग्रन्था अनया लिप्या लिखिताः। अनया लिप्या लिखिताः ग्रन्थाः बहुधा कासरगोडु प्रान्ते उपलभ्यन्ते। प्रायः तिगळारीलिपिलिखितासु मातृकासु अङ्कलेखनं कन्नडेनैव क्रियते। अतिविरलेषु प्रसङ्गेषु मलयाळलिप्या विशिष्टा अङ्का लिख्यन्ते।

### देवनागरी

देवनागरीलिपिरपि ब्राह्मीलिपिमूलैव। एतस्याः परिपूर्णविकासकालः क्रिस्तशकं १०-११ शतमानं स्यात्। केषाञ्चनाभिप्राये एतस्याः मूलं नागरीलिपिः। नगरीयजनाः विशेषतः गुर्जरप्रदेशीयवैदिकाः एतस्याः लिप्याः जनका इति 'नगर' शब्दमूलात् नागरीति एतस्याः नाम अभवदिति संशोधकानां वादः। एषा अद्यत्वे संस्कृतसाम्राज्यं शासतीव भाति। तत्र कारणं स्पष्टम्। समग्रं संस्कृतवाङ्मयं यथा देवनागर्यां मुद्रितं तथा नैवेतरासु लिपिषु प्रचारितम्। कारणं तु - अत्र गुरु-लघु-सूक्ष्म-स्थूल-वक्रा अनेके सुन्दरा इतरलिप्यगोचराः वर्णविन्यासाः पूर्वमेव सृष्टाः। क्रमेण संस्कृतभाषाप्रपञ्चे देवनागर्या एव आधिपत्यं बोभूयते।

इदानीमस्माभिः दृश्यमाणः शब्दकल्पद्रुमः प्रथमं वङ्गलिप्या मुद्रिता आसीत्। अधुना देवनागरीसंस्करणं वयं पश्यामः तद्द्वितीयसंस्करणम्। संस्कृतग्रन्थेषु देवनागरीलिप्या इतरलिप्यपेक्षया अधिकतरोपयोगो दृश्यते। अत्र च निर्णयसागर-चौखम्बा-मोतीलाल्बनारसीदासप्रभृति सम्स्कृतग्रन्थप्रकाशकानां प्रधानं पात्रं वर्तते। अत्र विशिष्य निर्णयसागरस्य महत्तमं पात्रम्।

सम्प्रति देवनागरीलिप्यनभिज्ञः संस्कृतविद्वान् कोऽपि नास्त्येव। पूर्वं तु संस्कृताध्ययनार्थं देवनागरीलिपिज्ञानस्य परमावश्यकता नासीत् यतो हि संस्कृतग्रन्थाः तेलुगु तमिळु इत्यादि अन्यलिपिषु मुद्रिता भवन्ति स्म। अधुना सर्वत्र भारते संस्कृताध्ययनं देवनागरीलिपिपरिचयपूर्वकमेवारप्स्यते।

अस्याः देवनागरीति अभिधानं किन्निमित्तमिति न स्पष्टम्। देवानां नगरे जातत्वाद्देवनागरीति अनेकेषां वादः। तदूर्जीकर्तुं ते नारदस्मृतेरमुं श्लोकम् उदाहरन्ति।

नाकरिष्यद् यदि ब्रह्मा लिखितं चक्षुरुत्तमम्।
तत्रेयमस्य लोकस्य नाभविष्यच्छुभा गतिः॥[ii]

अपि तु एतन्न केवलं देवनागरीलिपिसम्बद्धमपि तु सर्वलिपिसम्बद्धम्। भारते यथा सर्वस्य मूलं ईश्वर एव तथैव लिपिमूलमपि। अतोऽयं वादः न सर्वाङ्गीकारार्हः। तर्हि किमन्यत्स्यादिति जिज्ञासिते फलितः विचारः नगरे भवाः नागराः, तैरुपयुज्यमानत्वादेतदभिधानमिति।

देव इत्युक्ते महादेवः यतो हि नामैकदेशग्रहणेन नामग्रहणम्। महादेव एव संस्कृतभाषायाः व्याकरणशास्त्रस्य मूलम्। तस्य ढक्कानादोद्भूताः शब्दा एव शिवसूत्ररूपेण ख्याताः, अत एतस्याः लिप्याः मूलमपि स एव स्यात्। देवनगरीति काशीक्षेत्रं प्रसिद्धम्। तत्रत्यक्षेत्रदेवः महादेवः, अत एतस्याः 'देवनागरी' इत्यभिधानमिति विचारः समञ्जसतरं भवेत्।

## उपसंहार

एवं शिलायुगीननरेणान्विष्टा स्वाभिप्रायं स्वजनेषु सङ्केतयितुं काचित् रेखाङ्कितस्वरूपा एषा लिपिः काले काले देशे देशे तत्तज्जनानाम् आवश्यकतानुसारं परिष्कारं प्राप्यमाणा प्रवृद्धाऽभवत्। इत्थञ्च विविधाकारा विविधनाम्ना व्यवहारे प्रचलिता सती तां विना जीवननिर्वहणमेव दुर्भरं दुस्साध्यम् इतिवत् स्वस्याः स्थानं जनमानसे प्राप्तैषा। प्रतिदिनस्य व्यवहारादारभ्य I.T., B.T. यावत् सर्वक्षेत्रेषु विभिन्ननाम्ना उपयुज्यमाना सर्वोपकारिणी सर्वोपयोगिणी च सर्वत्र विलसत्येषा लिपिः।

## सन्दर्भग्रन्थसूची


1. ग्रन्थसम्पादनाशास्त्रम्, डा. एस्. जगन्नाथः, पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञ विद्यापीठम्, बेङ्गलूरु, २०१४।
2. भारतीय प्राचीन लिपिमाला, राय बहादुर पं. गौरीशङ्कर हीराचन्द ओझा, राजस्थानी ग्रन्थागार, जोधपुर, १९७१।
3. शारदा लिपि दीपिका, डा. श्रीनाथ तिक्कू, राष्ट्रिय संस्कृत संस्थानम्, नई दिल्ली, १९८८।
4. प्राचीन भारतीय लिपिगळु, डा. एस्.आर्. विघ्नराज, श्री मञ्जुनाथेश्वर संस्कृति संशोधन प्रतिष्ठान, धर्मस्थळ, २०२०।
5. Introduction to Manuscriptology, Dr. R.S. Shivaganeshamurthy, Sharada Publishing House, Delhi, 1996.
6. Manuscriptology - An Entrance, Dr. S. Jagannatha, Parimal Publications, New Delhi, 2007.
7. Nandinagari Script, P. Vishalakshy, Dravidian Linguistics Association, Kerala, 2003.
8. The Grantha Script, P. Vishalakshy, Dravidian Linguistics Association, Kerala, 2003.


---

[i] प्रायशो वट्टेळत्तु इति नामान्तरं दृश्यते।
[ii] नारदस्मृतिः, ४.७०